SK2-046

# संस्कृतम् सम्प्रेषणात्मकम्

## कक्षा - दशमी

## सङ्कलनात्मकं मूल्याङ्कनम् ( प्रथमसत्रम् )- 2012

निर्धारित समय : होरात्रयम् पूर्णाङ्काः 90

**निर्देशाः**

(i) प्रश्नपत्रे **चत्वारः खण्डाः** सन्ति :

| | | |
|---|---|---|
| खण्डः (क) अपठित-अवबोधनम् | - | **10 अङ्काः** |
| खण्डः (ख) रचनात्मक-कार्यम् | - | **15 अङ्काः** |
| खण्डः (ग) अनुप्रयुक्त-व्याकरणम् | - | **30 अङ्काः** |
| खण्डः (घ) पठित-अवबोधनम् | - | **35 अङ्काः** |

(ii) सर्वे प्रश्नाः **अनिवार्याः।**

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यं लेखनीया।

(v) उत्तराणि संस्कृतेन एव लेखनीयानि।

## खण्डः 'क'
## अपठित-अवबोधनम् ( 10 अङ्काः )

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

स्वतन्त्रभारतस्य सम्पूर्णं दायित्वम् अद्य छात्राणामुपरि अस्ति यतः अद्य ये विदयार्थिनः सन्ति ते एव श्वः स्वतन्त्रभारतस्य नागरिकाः भविष्यन्ति। भारतस्य उन्नतिः पतनञ्च तेषामेव उन्नति-पतनयोः निर्भरे स्तः। अतः छात्राः स्वभाविजीवनस्य निर्माणम् अतीव सतर्कतया सावधानतया च कुर्युः, इदमेव तेभ्यः अपेक्षते। त प्रत्येकं क्षणं स्वराष्ट्रं, स्वसमाजं, स्वधर्मं, स्वसंस्कृतिञ्च स्वनेत्रयोः पुरतः निक्षिपेयुः यतः तेषां जीवनेन राष्ट्रं किञ्चिद् बलं प्राप्तुं शक्नुयात्।

ये छात्राः राष्ट्रियदृष्टिकोणात् स्वजीवनस्य निर्माणं न कुर्वन्ति, ते राष्ट्राय, समाजाय वा भारभूताः एव भवन्ति। विद्यार्थिनां लक्ष्यं विद्योपार्जनमेवास्ति। विद्योपार्जनम् कृत्वा एव ते राष्ट्रं प्रति स्वकर्तव्यस्य निर्वाहं कर्तुं शक्नुवन्ति।

**(I) एकपदेन उत्तरत।** ½x4=2

(i) छात्राणामुपरि कस्य दायित्वम् अस्ति?

(ii) विद्यार्थिनां लक्ष्यं किम्?

(iii) छात्राः कस्य निर्माणम् सतर्कतया कुर्युः?

(iv) छात्राः कम् प्रति स्वकर्तव्यस्य निर्वाहं कर्तुम् शक्नुवन्ति?

**(II)** **पूर्णवाक्येन उत्तरत।** **1x2=2**

(i) छात्रेभ्यः किम् अपेक्षते ?

(ii) कीदृशाः छात्राः राष्ट्राय समाजाय वा भारभूताः एव भवन्ति।

**(III)** **निर्देशानुसारं शुद्धम् उत्तरं विकल्पेभ्यः चित्वा लिखत –** **1x4=4**

(i) अनुच्छेदे 'छात्राणाम्' इत्यस्य कः पर्यायः आगतः ?

(अ) तेषाम् (ब) भारतस्य

(स) विद्यार्थिनः (द) विद्यार्थिनाम्

(ii) 'शक्नुयात्' क्रियापदस्य कर्तृपदं किम् ?

(अ) तेषाम् (ब) राष्ट्रम् (स) बलं (द) जीवनेन

(iii) 'पृष्ठतः' इत्यस्य पदस्य कः विपर्ययः अनुच्छेदे आगतः ?

(अ) पुरतः (ब) ते (स) ये (द) तेभ्यः

(iv) 'तेषामेव' उन्नति-पतनयोः अत्र 'तेषाम्' पदं कस्मै प्रयुक्तम् ?

(अ) नागरिकेभ्यः (ब) शिक्षकेभ्यः

(स) छात्रेभ्यः (द) राष्ट्राय

**(IV)** **उपरिलिखितस्य अनुच्छेदस्य उचितं शीर्षकं लिखत।** **2**

## खण्डः 'ख'

## रचनात्मव -कार्यम् ( 15 अङ्काः )

**2.** **भवान् विपुलः। अमेरिकादेशस्य यात्रायाः वर्णनं कुर्वता स्वमित्रं शशाङ्कम् प्रति लिखितम् पत्रम् मञ्जूषायां दत्तैः उचितपदैः पूरयत।** **½x10=5**

कोलकातातः

तिथिः ............

प्रिय __(i)__ शशाङ्क !

सस्नेहं __(ii)__ ,

वयम् अत्र कुशलिनः। तत्रापि कुशलं कामये। अप्रैल मासस्य __(iii)__ तिथौ अहं __(iv)__ सह विमानेन अमेरिका देशम् __(v)__ । आवाम् अधुना 'शिकागो' नाम्नि नगरे स्वः। __(vi)__ अत्र रेलयानेन बसयानेन च यात्राम् कुर्वः। जनाः अत्र स्वकर्तव्यं, __(vii)__ च प्रति अतीव जागरूकाः सन्ति। अमेरिका तु अतीव __(viii)__ देशः अस्ति। जनाः अवकरम् अवकरपात्रे एव क्षिपन्ति। जूनमासस्य सप्तम्यां तिथौ अहं स्वदेशम् आगमिष्यामि। आगत्य विस्तरेण वदिष्यामि। गृहे __(ix)__ मम नमस्काराः।

भवतः प्रियं मित्रम्

__(x)__ ।

**मञ्जूषा**

| |
|---|
| विपुलः, सर्वेभ्यः, अगच्छम्, आवाम्, स्वच्छः, मित्र, स्वच्छताम्, एकादश्याम्, नमस्काराः, जनकेन |

3. मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत। 2x5=10



**मञ्जूषा**

| |
|---|
| वृक्षच्छेदनम्, हरिताः, पर्यावरणस्य, विनाशः, रोद्धव्यम्, अस्माकम्, सहायकाः, मेघवर्षणे, भूमिः, उन्नताः, प्रकृतेः, यच्छन्ति, कुर्वन्ति, जनाः, तिष्ठन्ति, पश्यामः। |

**अथवा**

मञ्जूषायाम् प्रदत्तशब्दानां सहायतया पर्यावरणम् इति विषयम् अधिकृत्य पञ्चवाक्यानि लिखत।

**मञ्जूषा**

| |
|---|
| महानगरेषु, उद्योगेभ्यः, वृक्षारोपणम्, प्रदूषिता जीवनस्य, नदी, प्लास्टिक स्यूताः, अवकरम्, मलिनम्, विषमयम्, जलम्, आधारः |

## खण्डः 'ग'

## अनुप्रयुक्त-व्याकरणम् ( 30 अङ्काः )

4. (I) अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं विच्छेदं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत। 1x3=3

(i) पद + छेदः तु पाठकस्य गुणः अस्ति।

(अ) पदछेदः (ब) पदत्छेदः

(स) पदच्छेदः (द) पदोच्छेदः

(ii) मदोद्धताः कपयः प्रहस्य अवदन्।

(अ) मद + उद्धताः (ब) मद् + ओद्धताः

(स) मदो + उद्धताः (द) मदेन + उद्धताः

(iii) कः शुचिरिह?

(अ) शुचि + रिह (ब) शुचिः + इह

(स) शुचिर + इह (द) शुचिर् + इह

(II) अधोलिखितवाक्ययोः रेखाङ्कितपदयोः सन्धिं सन्धिविच्छेदं वा कुरुत। 1x2=2

(i) सकलं ब्रह्माण्डं व्याकुलम् सञ्जातम्।

(ii) तच्छ्रुत्वा स + अश्रुनयनः यूथपतिः उवाच।

5. (I) **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।** **1x4=4**

(i) पिता पुत्राय बाल्ये महद् विद्याधनं यच्छति।

(अ) विद्या एव धनम् (ब) विद्या धनम्

(स) विद्या धनम् इव (द) विद्या च धनम च

(ii) एकः महीपालः आसीत्।

(अ) महीं पालनम् करोति इति (ब) महीं पालयति इति

(स) महीपालं करोति इति (द) महीं पालकः

(iii) देवानाम् अधिपतिः शक्रः राजानम् एकं चक्षुः अयाचत्।

(अ) देवअधिपतिः (ब) देवा:अधिपतिः

(स) देवाधिपतिः (द) देवान् अधिपतिः

(iv) पञ्चानां पात्राणां समाहारे जलम् आनयति।

(अ) पञ्चपात्रेषु (ब) पञ्चपात्र समाहारे

(स) पञ्चसु पात्रेषु (द) पञ्चपात्रे

(II) **अधोलिखितोः वाक्ययोः समासं विग्रहं वा कृत्वा लिखत।** **1x2=2**

(i) अष्टाध्यायी पाणिनिलिखितः ग्रन्थः अस्ति।

(ii) नरः साधोः वृत्तिम् समाचरेत्।

6. (I) **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा समुचित उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत।** **1x3=3**

(i) बालिकाभिः राष्ट्रगीतं गै + तव्यत्।

(अ) गातव्यः (ब) गातव्यम्

(स) गातव्या (द) गीतव्यम्

(ii) सः नरः एव युक्तः सुखी च भवति।

(अ) सुख + ई (ब) सुख + इन्

(स) सुख + ङीप (द) सुख + ईन्

(iii) न्यायाधीशेन न्यायः करणीयः।

(अ) कृ + अनीयर् (ब) कृ + अनीयः

(स) कर + णीयः (द) कृ + अणीयः

(II) **अधोलिखितवाक्ययोः रेखाङ्कितपदयोः प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत।** **1x2=2**

(i) मनुष्यः एकः समाज + ठक् प्राणी अस्ति।

(ii) बुद्धिमन्तः छात्राः समयस्य सदुपयोगं कुर्वन्ति।

7. **प्रदत्तविकल्पेभ्यः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत ।** **1x5=5**

(i) अपराधिनः __________ असत्यं वदन्ति।

(ii) हे ईश्वर! इदानीं त्वम् __________ मम सर्वस्वम्।

(iii) __________ भारतम् अतिसमृद्धम् आसीत्।

(iv) यथा करिष्यसि __________ फलं प्राप्स्यसि।

(v) दीने कृते दया __________ न भवति।

**मञ्जूषा**

| |
|---|
| वृथा, अधुना, नूनम्, एव, तथा, पुरा, अपि, एकदा |

8. (I) **अधोलिखित संवादे रिक्तस्थानानि वाच्यानुसारं प्रदत्तविकल्पेभ्यः उचितं पदं चित्वा पूरयत।** **1x3=3**

अंशुः – त्वं किम् पिबसि?

प्रांशुः – मया आम्ररसः __(i)__ ।

(अ) पिबामि (ब) पीयते

(स) पिब्यते (द) पीयन्ते

अंशुः – किं त्वम् गीतम् अपि गायसि?

प्रांशुः – आम्। __(ii)__ गीतम् अपि गीयते।

(अ) अहम् (ब) त्वया

(स) मया (द) तेन

अंशुः – अस्मभ्यं केन उपहाराः दीयन्ते?

प्रांशुः – __(iii)__ युष्मभ्यम् उपहारान् दास्यति?

(अ) रामम् (ब) रामः

(स) रामेण (द) रामाय

(II) **अधोलिखित सवादे वाच्यानुसारं रिक्तस्थानं पूरयत ।** **1x2=2**

अंशुः – अहो __(i)__ उपहाराः दीयन्ते! (राम)

प्रांशुः – आम, तन मित्रैः सह __(ii)__ । (आ + गम्)

9. **मोहनः कतिवादने किम् करोति इति संस्कृतसख्यापदेषु लिखत।** **1x4=4**

(i) 5 : 15 मोहितः __________ वादने देवालयं गच्छति।

(ii) 6 : 30 सः __________ व्यायामं करोति।

(iii) 6 : 45 सः: __________ स्नानं करोति।

(iv) 9 : 00 सः: __________ कार्यालयम् गच्छति।

## खण्डः 'घ'

## पठित-अवबोधनम् ( 35 अङ्काः )

10. **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

**गद्यांशः**

कस्मिंश्चित् नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म। तस्य पुत्राः वानरक्रीडारताः वानरयूथं नित्यमेव विविधैः भोज्यपदार्थैः पुष्टिं नयन्ति स्म। तस्मिन् राजगृहे बालवाहनयोग्यम् मेषयूथम् आसीत्। तेषां मेषाणां मध्ये एको मेषः जिह्वालोलुपतया अहर्निशं महानसं प्रविश्य यत् पश्यति तद् भक्षयति। ते च सूपकाराः यत्किञ्चित् काष्ठ-मृण्मयं भाजनं कांस्यताम्रपात्रं वा पश्यन्ति तेन तम् आशु ताडयन्ति स्म। मेषस्य सूपकाराणां कलहम् अवेक्ष्य नीतिविदाम् अग्रणीः वानरयूथपतिः अचिन्तयत्- 'एतेषां कलहो न वानराणां हिताय।'

**प्रश्नाः**

I. **एकपदेन उत्तरत।** **1x2=2**

(i) भूपतेः नाम किम् आसीत्?

(ii) कः महानसं प्रविश्य यत् पश्यति तत् भक्षयति?

II. **पूर्णवाक्येन उत्तरत।** **2x1=2**

वानरयूथपतिः किम् अचिन्तयत्? ½x2=1

III. **निर्देशानुसारम् उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत -**

(i) 'पश्यति' इति क्रियापदस्य कर्तृपदम् किम्?

(अ) वानरः (ब) सूपकारः (स) मेषः (द) नृपः

(ii) ''तम् आशु ताडयन्ति स्म'' अत्र 'तम्' पदं कस्मै प्रयुक्तम्?

(अ) नृपाय (ब) वानराय (स) मेषाय (द) सूपकाराय

**11. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

**पद्यांशः -**

काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्।।

I. **एकपदेन उत्तरत।** 1x2=2

(i) महाशनः कः अस्ति?

(ii) कामः कस्मात् उद्भवति?

II. **पूर्णवाक्येन उत्तरत।** 2x1=2

कम् वैरिणम् विद्धि?

III. **निर्देशानुसारं शुद्धम् उत्तरं विकल्पेभ्यः चित्वा लिखत।** ½x2=1

(i) 'जानीहि' इति पदस्य पर्यायपदं श्लोके किम् प्रयुक्तम्?

(अ) महाशनो (ब) विद्धि (स) वैरिणम् (द) इह

(ii) 'महापाप्मा' इति विशेषणपदं श्लोके कस्मै प्रयुक्तम्।

(अ) महाशनाय (ब) रजोगुणाय

(स) कामाय (द) लोभाय

**12. अधोलिखित नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

अर्जुनः - हे कृष्ण! इदं मनः अतीव चञ्चलं च शरीरस्य मथनकर्ता, बलवत्सु बलवान् अपि अस्ति। अतः अहम् तस्य नियन्त्रणं वायोः इव दुष्करम् मन्ये।

कृष्णः - हे महाबाहो अर्जुन! मनः अतीव काठिन्येन ग्रहणीयम् चञ्चलं चास्ति। एतत् अभ्यासेन, वैराग्येण च एव गृह्यते।

I. **एकपदेन उत्तरत।** 1x2=2

(i) चञ्चलं किम् अस्ति?

(ii) कृष्णः अर्जुनम् किम् कथयित्वा सम्बोधयति?

II. **पूर्णवाक्येन उत्तरत।** 1x2=2

(i) मनः कीदृशम् अस्ति?

(ii) मनसः वशीकरणं केन समं दुष्करम्?

III. **निर्देशानुसारम् शुद्धम् उत्तरं विकल्पेभ्यः चित्वा लिखत।** ½x2=1

(i) 'सरलम्' इति अस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(अ) कठिनम् (ब) निग्रहम् (स) दुष्करम् (द) सुदुष्करम्

(ii) 'मन्ये' इति क्रियापदस्य कर्तृपदं किम्?

(अ) अहम् (ब) दुष्करम् (स) तस्य (द) वायोः

13. मञ्जूषातः उचितपदानि चित्वा अधोलिखितश्लोकयोः भावार्थं पूरयत। ½x8=4

I. किं मरणम्? मूर्खत्वम्, किं चानर्घम्? यदवसरे दत्तम्।
आमरणात्किं शल्यम्? प्रच्छन्नं यत्कृतं पापम्।।

भावार्थ - संसारे जनानां ___(i)___ एव तेषां मरणम् भवति, एवम् एव उचिते समये दानमेव ___(ii)___ भवितुम् शक्नोति। जनाः यत् पापं प्रच्छन्नरूपेण ___(iii)___ तत् एव ___(iv)___ तान् कण्टकमिव पीडयति।

II. अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति!
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्।।

भावार्थ - हे देवि सरस्वति! तव अयं ___(v)___ अदभुतः एव अस्ति। यदा वयम् अस्य ___(vi)___ कुर्मः तदा एषः ___(vii)___ यदा च वयम् ___(viii)___ कुर्मः तदा नाशं प्राप्नोति।

**मञ्जूषा**

| मृत्यपर्यन्तं, मूर्खता, लाभदायकं, कुर्वन्ति, कोशः, वर्धते, सञ्चयं व्ययं |
|---|

14. मञ्जूषातः समुचितं पदं चित्वा निम्नलिखितश्लोकस्यः अन्वयम् पूरयत। 1x4=4

तस्मात् स्यात् कलहो यत्र गृहे नित्यमकारणः।
तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत्।।

अन्वयः - तस्मात् यत्र गृहे ___(i)___ अकारणः ___(ii)___ स्यात् ___(iii)___ वाञ्छन् तदगृहं ___(iv)___ परिवर्जयेत्।

**मञ्जूषा**

| नित्यं, जीवितं, दूरतः, कलहः |
|---|

15. वाक्येषु रेखाङ्कितपदानां स्थाने उचितं प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत। 1x4=4

(i) अवसरे दत्तम् अनर्घम् भवति।
(ii) राजा शिविः अमात्यान् उवाच।
(iii) प्राणिनां मूढता निद्रा कथिता।
(iv) ज्वलन् मेषः अश्वशालां प्रविशति।

16. अधोलिखितवाक्यानि घटनाक्रमेण पुनः लेखनीयानि। ½x8=4

(i) अमात्याः रुदन्तः अवदन्।
(ii) अहं भवन्तम् एकस्य नेत्रस्य दानं याचे।
(iii) नृपः द्वयोः नेत्रयोः दानं दातुं तत्पराऽभवत्।
(iv) महाराज! अलम् एतावता दुस्साहसेन, प्रभूतं धनमेव यच्छतु।
(v) तदा शक्रः आगत्य नृपाय वरम् अयच्छत्।
(vi) शक्रः नृपस्य परीक्षार्थं अन्धस्य रूपं धृत्वा आगच्छत्।
(vii) अनेन मम लोकयात्रा निर्बाधा भविष्यति।
(viii) व्रणविरोपणे जाते एकदा नृपः सरोवरतटे विचरति स्म।

**17. रेखाङ्कितपदानां प्रसगानुसारम् उचितम् अर्थं चित्वा लिखत।** **1x4=4**

(i) <u>यूथपतिः</u> अवदत्।

| | | | |
|---|---|---|---|
| (अ) | समूहस्य स्वामी | (ब) | एकान्ते |
| (स) | वित्तम् | (द) | रजनी |

(ii) याचकाः <u>अभीष्टानि</u> वस्तूनि प्राप्य संतोषं भजन्ते।

| | | | |
|---|---|---|---|
| (अ) | दत्तानि | (ब) | आगतानि |
| (स) | इच्छितानि | (द) | स्थूलानि |

(iii) <u>सकलं</u> ब्रह्माण्डं विस्मृतं जातम्।

| | | | |
|---|---|---|---|
| (अ) | समस्तं | (ब) | सर्वे |
| (स) | सर्वत्र | (द) | कालेन सहितं |

(iv) हा <u>दग्धाः</u> मे घोटकाः कथं रक्षणीयाः ?

(अ) अश्वाः (ब) वानराः (स) ज्वलिताः (द) दुग्धः

-oOo-